खलाशनहलान्युदक्। कर्मसङ्गमयुद्धेषु प्रवेशे नष्टमार्गणे। यानव्यस्तगता ग्राह्या विशेषश्चात्र वक्ष्यते। दिवा प्रस्थानवद्ग्राह्याः कुरङ्गरुरुवानराः। अह्नश्च प्रथमे भागे चाषवञ्जुलकुक्कुटाः। पश्चिमे शर्वरीभागे नप्तृकौलूकपिङ्गलाः। सर्वं एव विपर्यस्ता ग्राह्याः सार्थेषु योषिताम्। नृपसन्दर्शने ग्राह्याः प्रवेशेऽपि प्रयाणवत्। गिरिवरण्यप्रवेशे च नदीनां चावगाहने। वामदक्षिणगौ शस्तौ यौ तु तावग्रपृष्ठगौ। क्रियादीप्तौ विनाशाय यातुः परिघसञ्ज्ञितौ। तावेव तु यथाभागं प्रशान्तरुतचेष्टितौ। शकुनौ शकुनद्वारसञ्ज्ञितावर्थसिद्धये। केचित्तु शकुनद्वारमिच्छन्त्युभयतः स्थितैः। शकुनैरेकजातीयैः शान्तचेष्टाविराविभिः। विसर्जयति यद्येक एकस्य प्रतिषेधति। स विरोधोऽशुभो यातुर्ग्राह्यो वा बलवत्तरः। पूर्वं प्रावेशिको भूत्वा पुनः प्रास्थानिको भवेत्। सुखेन सिद्धिमाचष्टे प्रवेशे तद्विपर्ययः। विमर्घ्य शकुनः पूर्वं स एव निरुणद्धि चेत्। प्राह यातुररेर्मृत्युं डमरं रोगमेव वा। अपसव्यास्तु शकुना दीप्ता भयनिवेदिनः। आरम्भे शकुनो दीप्तो वर्षान्तस्तद्भयङ्करः। तिथिवाय्वर्कभस्थानचेष्टादीप्ता यथाक्रमम्। धनसैन्यबलाङ्गेष्टकर्मणां स्युर्भयङ्कराः। जीमूतध्वनिदीप्तेषु भयं भवति मारुतात्। उभयोः सन्ध्ययोर्दीप्ताः शस्त्रोद्भवभयङ्कराः। चितिकेशकपालेषु मृत्युबन्धवधप्रदाः। कण्टकीकाष्ठभस्मस्थाः कलहायासदुःखदाः। अप्रसिद्धं भयं वापि निःसाराश्मव्यवस्थिताः। कुर्वन्ति शकुना दीप्ताः शान्ता याप्यफलास्तु ते। असिद्धिसिद्धिदौ ज्ञेयौ निर्ह्रादाहारकारिणौ। स्थानाद्रुवन् व्रजेद्यात्रां शंसते त्वन्यथागमम्। कलहः स्वरदीप्तेषु स्थानदीप्तेषु विग्रहः। उच्चमादौ स्वरं कृत्वा नीचं पश्चाच्च घोषकृत्। एकस्थाने रुवन्दीप्तः सप्ताहाद्ग्रामघातकृत्। पुरदेशनरेन्द्राणामृत्वयनवत्सरात्। सर्वे दुर्भिक्षकर्तारः स्वजातिपिशिताशनाः। सर्पमूषिकमार्जारपृथुरोमविवर्जिताः। परयोनिषु गच्छन्तो मैथुनं देशनाशनाः। अन्यत्र वेसरोत्पत्तेर्नॄणां चाजातिमैथुनात्। बन्धघातभयानि स्युः पादोरुमस्तकान्तिगैः। अग्रास्यपिशिताद्यैश्च वेश्मोपच्छतग्रहाः। क्रूरोग्रदोषदुष्टैश्च प्रधाननृपपत्तकैः। चिरकालैश्च दीप्ताद्यास्त्वागमो दिक्षु तन्नृणाम्। सद्रव्यो बलवांश्च स्यात्सद्रव्यस्यागमो भवेत्। द्युतिमान् विनतग्रीवो सौम्यो दारुणपक्षकृत्। विदिक्स्थः शकुनो दीप्तो वामस्थेनानुवाशितः। स्त्रियाः संग्रहणं प्राह तद्दिगाख्यातयोनितः। शान्तः पञ्चमदीप्तेन विरुतो विजयावहः। दिग्नरागमकारी वा दोषकृत्तद्विपर्यये। वामसव्यरुतो मध्यः प्राह स्वपरयोर्भयम्। मरणं कथयन्त्येते सर्वे समविराविणः। इक्षाम्रमध्यमूलेषु गजाश्वरथिकागमः। दीर्घान्नसुषिताग्रेषु नरनौशिविकागमः। शकटेनोन्नतस्थे च छायास्थे छत्रसंयुतः। एकत्रिपञ्चसप्ताहात् पूर्वाद्यास्त्वन्तरासु च। सुरपतिहुतवहयमनिर्ऋतिवरुणपवनेन्दुशङ्कराः। प्राच्यादीनां पतयो दिशः पुमांसोऽङ्गना विदिशः। तरुतालीविदलाम्बरसलिलजशरचर्मपट्टलेखाः स्युः। द्वात्रिंशत्प्रविभक्ते दिक्चक्रे तेषु कार्याणि। व्यायामशिखिनिकूजितकलहाम्भोनिगडमन्त्रगोशब्दाः। वर्णाश्च रक्तपीतकृष्णसिताः कोणगा मिश्राः। चिह्नं ध्वजो दग्धमथ श्मशानं दरी जलं पर्वतयज्ञघोषाः। एतेषु संयोगभयानि विन्द्यात् अन्यानि वा स्थानविकल्पितानि। स्त्रीणां विकल्पे वृहती कुमारी व्यङ्गा विगन्धा त्वथ नीलवस्त्रा। कुस्त्री प्रदीर्घा विधवा च तास्ता संयोगचिन्तापरिवेदिकाः स्युः। पृच्छासु रूप्यकनकातुरभामिनीनां मेषाव्ययानमखगोकुलसंश्रयासु। न्यग्रोधरक्ततरुलोध्रककीचकाख्यास्तद्रुमाः खदिरबिल्वनगार्जुनाश्च"।

अन्यानि शुभाशुभशकुनानि तत्रोक्तानि तत्तच्छब्दे उक्तानि

**दुः(दुश्श)शला** स्त्री धृतराष्ट्रकन्यायाम् वा रोः शः। दुश्शला। "कुण्डजाश्चैकस्यैव दुःशला च शताधिका" भा० आ० ६७अ०। [दुःखेन शिष्यमाणे।

**दुःशास** त्रि० दुःखेन शिष्यतेऽसौ शास–कर्मणि वेदे खल्।

**दुःशासन** त्रि० दुःखेन शिष्यतेऽसौ "भाषायां शासियुधिदृशिधृषिमृषिभ्यो युच्" पा० भाषायां युचो विधानात् कर्मणि युच्। दुःखेन शिष्यमाणे दुर्योधनादिसध्ये २धृतराष्ट्रपुत्रभेदे पु०। "दुर्योधनोयुयुत्सुश्च राजन्! दुःशासनस्तथा" भा०आ० ६७अ०

**दुः(श्शी)शील** त्रि० दुष्टं शीलमस्य वा रोः शः। दुष्टशीले "पूर्वमप्यतिदुःशीलो न धैर्यं कर्त्तुमर्हति" भा०स०२०अ०

**दुःशोध** त्रि० दुर्+शुध–कर्मणि खल्। १दुःखेन शोधनीये प्रतीकार्ये च त्रि० "तथैव खलु दुःशोधान् शोधयेत् क्षारकर्मणा" सुश्रु०। [वा षः। दुष्टे सन्धौ

**दुः(दुष्ष)षन्धि** पु० दुष्टः सन्धिः सुषामा० षत्वं विसर्गस्य

**दुः(दुष्ष)षमम्** अव्य०दुष्टं समम् तिष्ठद्गु० अव्ययी० षत्वं